श्रीःगुरुभ्यो नमः महागणपतये नमः

# ।। श्रीमद्वायुमहापुराणम् ।।

**अनुवादकः - डा.माधव पाण्डुरङ्गी**

## **प्रथमाध्यायः** (अनुक्रमणिका)

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ।।

नारायणादीन् नमस्कृत्य जयम् (पुराणं) अभ्यसेत् ।

पूर्वपीठिका - पुरा असीमकृष्णनामकः कश्चित् भूपतिः धर्मेण राज्यं शासति स्म । तदा जितेन्द्रियाः ऋषयः कुरुक्षेत्रे दृषद्वत्याः तीरे महत्सत्रम् आरभन्त ।

तदा तत्रागतः सूतपुराणिकः तान् उपदिदेश । तेन च मुनीनां रोमाणि हृष्टाणि बभूवुः इति अयं लोमहर्षणः इति प्रथितः ।

लोमानि हर्षयाञ्चक्रे श्रोतॄणां यत्सुभाषितम् ।
कर्मणा प्रथितस्तेन लोकेऽस्मिन् लोमहर्षणः ।। (१६)

पृथुना आचरित सूतियागे इन्द्रदेवताकहविषः बृहस्पतिमन्त्रकहविः संयोज्य अर्पितम् । तदा अयं सूतः जन्म प्रापत् । सूतस्यास्य वेदे अधिकारः नास्ति, केवलं अयं पुराणान् उपदिशति ।

पुराणेऽस्मिन् मन्वन्तराणां सष्टेः, कालसूक्ष्मानां, सस्यानां, प्रजानां, ऋषीणां, पितॄणां, देशनदीनां, द्वीपानां, ग्रहाणां, सूर्यचन्द्रगतीनां, यागानां यदुप्रभृतिवंशानां, नैमिषादीनां वर्णनं दृश्यते । समग्रपुराणस्य विषयसङ्ग्राहकोऽयं प्रथमाध्यायः अनुक्रमणिकारूपेण वर्तते ।

विशेषविचारः - पुराणानि अधीत्य व्याख्यानं कुर्यात् । अज्ञानिनो अपार्थं कुर्युः इति वेदाभिमानिनी बहुधा बिभेति ।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति ।। (१८४)

अध्यायः - २

जगत्सृष्टिः -

भ्रमतो धर्मचक्रस्य यत्र नेमिरशीर्यत ।
कर्मणा तेन विख्यातं नैमिषं मुनिपूजितम् ।। ७ ।।

धर्माख्यचक्रस्य नेमिपतितस्थलमेव नैमिषारण्यम् । क्षेत्रमेतत् गोमतीतीरे चकास्ति । वशिष्ठ - विश्वामित्रयोः कलहास्पदं क्षेत्रम् । राजा पुरूरवः उर्वश्या सह सत्रमेकं प्रारभत । तदा गङ्गा अग्निना तेजोमयगर्भं धृत्वा पर्वते अपातयत् । ततश्च स पर्वतः तेजोमयो अप्रकाशत । तत्र विष्णुः सुवर्णमयीं यज्ञशालाम् अरचयत् । ऐलः अविवेकेन तां अपहर्तुं अक्रमत् । ततश्च सः मुनितेजसा हतः । ततः ऊर्वशीपुत्रः आयुः अभिषिक्तः । पितृवधेन खिन्नः आयुः ऋषिवचनं सम्मन्त्र्य दीर्घं सत्रं प्रारभत । बहुविभवेन सत्रे समाप्ते देवाः तत्वोपदेशार्थं वायुं ययाचिरे । ततः अणिमादिसिद्धियुक्तः, वशीकृतसप्तगणः, महाव्याकरणज्ञः 'वातारिणी' इति प्रख्यातो वायुः उपदेष्टुं प्रारभत ।

**अध्यायः - ३**

**मङ्गळाचरणम् -** आदौ वायुः, महेश्वरं-प्रजापतिं-ऋषि-एकविंशतिक्रोधनामकपुरुषः - बृहस्पति - शुक्रप्रभृतीन् नमस्कृत्य, ब्रह्माणं स्तौति । लोकपितामहः ब्रह्मा जगत् सृष्टिकर्ता । जगत्यस्मिन् सकलविधजीवराशिः, नैकजडवस्तूनि च आश्रितानि । ब्रह्मकृतसृष्ट्यनुसारेण मयोपदिष्टं शृणुत इति वायुः प्रारभत ।

**अध्यायः - ४**

देवेभ्यः वाय्वुपदिष्टं तत्वं सूतपुराणिकः ऋषिभ्यः उपदिशति । पुराणेऽस्मिन् (वायुपुराणे) चत्वारः पादाः सन्ति ।

१. प्रक्रियापादः - अत्र सृष्टि-स्थितिविषयाः प्रतिपादिताः

२. उपोद्घातः- कथावस्तुविषयकः

३. अनुषङ्गपादः - धर्मविषयकः

४. उपसंहारकः - आयुषः सर्वपापप्रणाशनविषमः

**अध्यायः - ४८**

**गयाक्षेत्रविधिः** - गयाक्षेत्रयात्री जितेन्द्रियः परान्नत्यागी शुचिः भवेत् । गयाक्षेत्रस्य पूर्वस्यां नद्यां स्नानमाचरेत् । तत्र पिण्डप्रदान-तर्पणादिभिः पितृदेवता कवि-अबल-अनल-सोम-यम-अर्यमा-अग्निष्वात्त-बर्हिषद-सोमपाः तृप्यन्ति । तिलतर्पणेन आब्रह्मणः तृणपर्यन्तं सकलजीवराशयः तृप्यन्ति ।

गयायां पिण्डदानेन आत्महत्याभागिनः, सन्तानहीनाः, अग्निदग्धाः, अकाले मृताः, एवं प्रभृतयः अपि च तत्कुलप्रसूताः यादृशावस्थापन्नाः अपि सद्गतिं यान्ति ।

श्राद्धकाले पठनीयानां प्रसिद्धश्लोकानां उल्लेखः अत्रास्ति ।

आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ।

तृप्यन्तु पितरः सर्वे मातृमातामहादयः ।। ४८-२१

अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।।

आब्रह्मभुवनाल्लोकाः इदमस्तु तिलोदकम् ।। ४८-२३

अपि च पिण्डप्रदानाङ्गतिलतर्पणकाले पठ्यमानानाम् अष्टाविंशति श्लोकानाम् उल्लेखः अत्र दृश्यते ।

**अध्यायः - ४९**

**गयाक्षेत्रमहिमा इत्यादि —** गयाक्षेत्रयात्री उत्तरमानससरोवरं गत्वा तर्पणपुरस्सरं पिण्डप्रदानं कुर्यात् । ततः उदीचीतीर्थं कनकलतीर्थं-फल्गुतीर्थं (तीर्थेऽस्मिन् ब्रह्माचरितहोमरजांसि सन्ति) इत्यादि गच्छेत् । ततः गयागधादरं सन्दर्श्य धर्मारण्यं च गच्छेत् ।

तत्र धर्मराजः यागम् अनुष्ठितवान् । ततः मातङ्गतीर्थं अश्वत्थवृक्षं ब्रह्मतीर्थश्च गत्वा शुनकेभ्यः बलिं दद्यात् । एवं कश्यपस्य आश्रमं, गार्हपत्यं, शुक्रं, क्रौञ्चदेशांश्च सङ्गच्छेत् । कश्यपाश्रमे भारद्वाजमुनिकृतपिण्डप्रदानस्थलमस्ति । पिण्डप्रदानं विष्णुपदे एव कुर्यात् । अतो श्रीरामः भीष्मश्च स्वपितृहस्तयोः पिण्डान् अदत्वा विष्णुपदे पिण्डान् अदाताम् । तेन तत्पितरः सद्गतिमापुः । एवं गयायां विष्णुपादे पिण्डप्रदानः अतीव पुण्यकरः ।

**अध्यायः - ५०**

**गयामहिमा इत्यादि -** पुरा गयनामकराजा भूरि-अन्नसन्तर्पण-दक्षिणादिभिः क्रतुमेव आचचार । ततः गयः 'ब्रह्मणा शप्ताः ब्राह्मणाः 'पूर्ववदिव मान्याः भवन्तु' इति देवेषु वरं ययाचे । ततः तन्नगरं 'गया' इति प्रसिद्धम् । अत्र विशालनामको नृपतिः गयायां श्राद्धं कृत्वा पितृकुलं ररक्ष । ततः पुत्रपौत्रसमायुक्तो बभूव । क्षेत्रेऽस्मिन् गायत्री-सरस्वती-विशालतीर्थ-लेलिहान-आकाशगङ्गा-गिरिकर्णमुखं-वैतरणी-देवनदी-पुष्करणी-वृतकुल्य-कोटितीर्थ-प्रभृतितीर्थानि सन्ति ।

धर्मराजः कमलवनस्थपाण्डनामकशिलोपरि पिण्डं (स्वपितृहस्ते अदत्वा) प्रादात् । तत्पुण्येन राज्यमवाप ।

गया-गयासुरः-गयादित्यः-गायत्री-गदाधार-गयाख्यानानि-एतानि षट् मुक्तिदायकानि ।

वायुपुराण श्रवण-पठनेन गृहे सम्पत्तिः वर्धते । गृहे वायुपुराणस्थापनेन पितरः मुच्यन्ते ।

(वायुपुराणम् सम्पूर्णम्)

**अनुवादकः - डा.माधव पाण्डुरङ्गी**